## શ્રીવરવરમુનિભિરનુગ્રુહીતા
## ॥ યતિરાજ વિમ્શતિ: ॥

ય: સ્તુતિમ યતિપતિ પ્રસાદિનીમ
વ્યાજહાર યતિરાજ વિમ્શતિમ ।
તમ પ્રપન્ન જન ચાતકામ્બુદમ
નૌમિ સૌમ્યવર યોગિ પુઙ્ગવમ ॥

શ્રીમાધવાઙ્ઘ્રિ જલજદ્વય નિત્યસેવા
પ્રેમાવિલાશય પરાઙ્કુશ પાદભક્તમ ।
કામાદિ દોષ હરમ આત્મ પદાશ્રિતાનામ
રામાનુજમ યતિપતિમ પ્રણમામિ મૂર્ધ્ના ॥ 1

શ્રીરઙ્ગરાજ ચરણામ્બુજ રાજહમ્સમ
શ્રીમત પરાઙ્કુશ પદામ્બુજ ભ્રુઙ્ગરાજમ ।
શ્રીભટ્ટનાથ પરકાલ મુકાબ્જ મિત્રમ
શ્રીવત્સચિહ્ન શરણમ યતિરાજમ ઈડે ॥ 2

વાચા યતીન્દ્ર મનસા વપુષા ચ યુષ્મત
પાદારવિન્દ યુગળમ ભજતામ ગુરૂણામ ।
કૂરાધિનાથ કુરુકેશ મુખાદ્ય પુમ્સામ
પાદાનુચિન્તન પર: સતતમ ભવેયમ ॥ 3

નિત્યમ યતીન્દ્ર તવ દિવ્યવપુ: સ્મ્રુતૌ મે
શકતમ મનો ભવતુ વાક ગુણ કીર્તને–સૌ ।
કુત્યઞ્ચ દાસ્ય કરણમ તુ કર દ્વયસ્ય
વ્રુત્ત્યન્તરે–સ્તુ વિમુખમ કરણ ત્રયઞ્ચ ॥ 4

અષ્ટાક્ષરાખ્યમનુરાજ પદ ત્રયાર્થ નિષ્ઠામ
મમાત્ર વિતરાદ્ય યતીન્દ્ર નાથ ।
શિષ્ટાગ્રગણ્ય જન સેવ્ય ભવત પદાબ્જે
હ્રુષ્ટાસ્તુ નિત્યમ અનુભૂય મમાસ્ય બુદ્ધિ: ॥ 5

અલ્પાપિ મે ન ભવ્દીય પદાબ્જ ભક્તિ:
શબ્દાદિ ભોગ રુચિર અન્વહમ એધતે હા ।
મત પાપમ એવ હિ નિદાનમ અમુષ્ય નાન્યત
તદ વારયાર્ય યતિરાજ દયૈક સિન્ધો ॥ 6

વ્રુત્યા પશુર નરવપુસ્ત્વહમ ઈદ્રુશો–પિ
        શ્રુત્યાદિ સિદ્ધ નિખિલાત્મ ગુણાશ્રયો–યમ ।
ઈત્યાદરેણ કુતિનો–પિ મિથ: પ્રવકતુમ
        અદ્યાપિ વઞ્ચન પરો–ત્ર યતીન્દ્ર! વર્તે ॥ 7

દુ:ખાવહો–હમ અનિશમ તવ દુષ્ટ ચેષ્ટ:
        શબ્દાદિ ભોગ નિરત: શરણાગતાખ્ય: ।
ત્વત પાદ ભકત ઈવ શિષ્ટ જનૌઘ મધ્યે
        મિથ્યા ચરામિ યતિરાજ! તતો–સ્મિ મૂર્ખ: ॥ 8

નિત્યમ ત્વહમ પરિભવામિ ગુરુમ ચ મન્ત્રમ
        તદ્દેવતામ અપિ ન કિઞ્ચિત અહો બિભેમિ ।
ઈત્થમ શઠો–પ્યશઠવત ભવદીય સઙ્ઘે
        હ્રુષ્ટ: ચરામિ યતિરાજ! તતો–સ્મિ મૂર્ખ: ॥ 9

હા હન્ત હન્ત મનસા ક્રિયયા ચ વાચા
        યો–હમ ચરામિ સતતમ ત્રિવિધાપચારાન ।
સો–હમ તવાપ્રિયકર: પ્રિયકુદ્વત એવ
        કાલમ નયામિ યતિરાજ! તતો–સ્મિ મૂર્ખ: ॥ 10

પાપે કુતે યદિ ભવન્તિ ભયાનુતાપ લજ્જા:
        પુન: કરણમ અસ્ય કથમ ઘટેત ।
મોહેન મે ન ભવતીહ ભયાદિ લેશ:
        તસ્માત પુન: પુનરઘમ યતિરાજ! કુર્વે ॥ 11

અન્તર્બહિ: સકલ વસ્તુષુ સન્તમ ઈશમ
        અન્ધ: પુર: સ્થિતમ ઈવાહમ અવીક્ષમાણ: ।
કન્દર્પવશ્ય હ્રુદય: સતતમ ભવામિ
        હન્ત ત્વદગ્ર ગમનસ્ય યતીન્દ્ર! નાર્હ: ॥ 12

તાપ ત્રયી જનિત દુ:ખ નિપાતિનો–પિ
        દેહ સ્થિતૌ મમ રુચિસ્તુ ન તન્નિવ્રુત્તૌ ।
એતસ્ય કારણમ અહો મમ પાપમ એવ
        નાથ! ત્વમ એવ હર તત યતિરાજ! શીઘ્રમ ॥ 13

વાચામ અગોચર મહા ગુણ દેશિકાગ્ર્ય
        કૂરાધિ નાથ કથિતાખિલ નૈચ્ય પાત્રમ ।
એષોહમેવ ન પુનર્જગત ઈદ્રુશસ્તદ
        રામાનુજાર્ય કરુનૈવ તુ મદ્ગતિસ્તે ॥ 14

શુદ્ધાત્મ યામુન ગુરૂત્તમ કૂર નાથ
        ભટ્ટાખ્ય દેશિક વરોકત સમસ્ત નૈચ્યમ ।
અદ્યાસ્ત્યસઙ્કુચિતમ એવ મયીહ લોકે
        તસ્માત યતીન્દ્ર! કરુણૈવ તુ મદ્ગતિસ્તે ॥ 15

શબ્દાદિ ભોગ વિષયા રુચિર અસ્મદીયા
        નષ્ટા ભવત્વિહ ભવત દયયા યતીન્દ્ર! ।
ત્વત દાસ દાસ ગણના ચરમાવધૌ ય:
        તદ્દાસતૈક રસતા–વિરતા મમાસ્તુ ॥ 16

શ્રુત્યગ્ર વેદ્ય નિજ દિવ્ય ગુણ સ્વરૂપ:
        પ્રત્યક્ષતામ ઉપગતસ્ત્વિહ રઙ્ગરાજ: ।
વશ્ય: સદા ભવતિ તે યતિરાજ તસ્માત
        શકત: સ્વકીય જન પાપ વિમોચને ત્વમ ॥ 17

કાલ ત્રયે–પિ કરણ ત્રય નિર્મિતાતિ
        પાપ ક્રિયસ્ય શરણમ ભગવત ક્ષમૈવ ।
સા ચ ત્વયૈવ કમલારમણે–ર્થિતા યત
        ક્ષેમસ સ એવ હિ યતીન્દ્ર! ભવચ્છ્રિતાનામ ॥ 18

શ્રીમન યતીન્દ્ર! તવ દિવ્ય પદાબ્જ સેવામ
        શ્રીશૈલ નાથ કરુણા પરિણામ દત્તામ ।
તામ અન્વહમ મમ વિવર્ધય નાથ! તસ્યા:
        કામમ વિરુદ્ધમ અખિલઞ્ચ નિવર્તય ત્વમ ॥ 19

વિજ્ઞાપનમ યદિદમ અદ્ય તુ મામકીનમ
        અઙ્ગી કુરુષ્વ યતિરાજ! દયામ્બુરાશે ।
અજ્ઞો–યમ આત્મ ગુણ લેશ વિવર્જિતશ ચ
        તસ્માત અનન્ય શરણો ભવતીતિ મત્વા ॥ 20

ઈતિ યતિકુલ ધુર્યમ એધમાનૈઃ
શ્રુતિ મધુરૈર ઉદિતૈઃ પ્રહર્ષયન્તમ ।
વરવરમુનિમ એવ ચિન્તયન્તી
મતિર ઈયમ એતિ નિરત્યયમ પ્રસાદમ ॥

**॥ ઈતિ યતિરાજ વિમ્શતિઃ સમાપ્તા ॥**

---